# अधोलिखितानि पदानि ध्यानेन पठतु

| ==== दकारान्तः एतद् शब्दः ==== | | |
|---|---|---|
| **पुंलिङ्गे** | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एषः | एते |
| **षष्ठी** | एतस्य | एतेषाम् |
| | | |
| **स्त्रीलिङ्गे** | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एषा | एताः |
| **षष्ठी** | एतस्याः | एतासाम् |
| | | |
| **नपुंसकलिङ्गे** | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | एतत् / एतद् | एतानि |
| **षष्ठी** | एतस्य | एतेषाम् |

| ==== दकारान्तः तद् शब्दः ==== | | |
|---|---|---|
| पुंलिङ्गे | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सः | ते |
| **षष्ठी** | तस्य | तेषाम् |
| | | |
| **स्त्रीलिङ्गे** | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सा | ताः |
| **षष्ठी** | तस्याः | तासाम् |
| | | |
| **नपुंसकलिङ्गे** | | |
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | तत् / तद् | तानि |
| **षष्ठी** | तस्य | तेषाम् |

| दकारान्तः अस्मद् शब्दः - त्रिषु लिङ्गेषु समानः | | |
|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | अहम् | वयम् |
| **षष्ठी** | मम / मे | अस्माकम् / नः |

| दकारान्तः युष्मद् शब्दः - त्रिषु लिङ्गेषु समानः | | |
|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **बहुवचनम्** |
| **प्रथमा** | त्वम् | यूयम् |
| **षष्ठी** | तव / ते | युष्माकम् / वः |


# एतस्य / एतस्याः – तस्य / तस्याः नाम?  (त्रिषुलिङ्गेषु)



## अधोलिखितानि पदानि ध्यानेन पठतु

| | | **प्रथमा एकवचनम्** | **षष्ठी एकवचनम्** | **प्रथमा बहुवचनम्** | **षष्ठी बहुवचनम्** |
|---|---|---|---|---|---|
| **एतद्** | पुंलिङ्गे | एषः | एतस्य | एते | एतेषाम् |
| | स्त्रीलिङ्गे | एषा | एतस्याः | एताः | एतासाम् |
| | नपुं -लिङ्गे | एतत्/एतद् | एतस्य | एतानि | एतेषाम् |
| | | | | | |
| **तद्** | पुंलिङ्गे | सः | तस्य | ते | तेषाम् |
| | स्त्रीलिङ्गे | सा | तस्याः | ताः | तासाम् |
| | नपुं -लिङ्गे | तत्/तद् | तस्य | तानि | तेषाम् |
| | | | | | |
| **अस्मद्** | त्रिषुलिङ्गेषु | अहम् | मम /मे | वयम् | अस्माकम् / नः |
| | | | | | |
| **युष्मद्** | त्रिषुलिङ्गेषु | त्वम् | तव /ते | यूयम् | युष्माकम् / वः |

## उदाहरणानि पठतु

| **एतद् शब्दः** | | |
|---|---|---|
| पुंलिङ्गे |  | एषः बालकः ।<br>एतस्य नाम मोहनः। |
| स्त्रीलिङ्गे |  | एषा बालिका।<br>एतस्याः नाम राधा। |
| नपुंसकलिङ्गे |  | एतत् पुष्पम्।<br>एतस्य नाम कमलम्। |

| | | |
|---|---|---|
| **तद् शब्दः** | | |
| पुंलिङ्गे |  | सः अध्यापकः ।<br>तस्य नाम गिरिधरमहोदयः। |
| स्त्रीलिङ्गे |  | सा अध्यापिका।<br>तस्याः नाम रोहिणी। |
| नपुंसकलिङ्गे |  | तत् फलम् ।<br>तस्य नाम आम्रफलम्। |
| | | |
| **युष्मद् शब्दः (त्रिषुलिङ्गेषु)** | | |
| |  | त्वं विदूषकः।<br>तव नाम राघवः। |
| | | त्वं नर्तकी।<br>तव नाम शाम्भवी। |

| | | |
|---|---|---|
| |  | |
| |  | त्वं पुस्तकम्। <br> तव नाम रामायणम्। |
| | | |
| **अस्मद् शब्दः त्रिषुलिङ्गेषु** | | |
| |  | अहम् अर्चकः। <br> मम नाम विजयेन्द्रः। |
| |  | अहं देवी । <br> मम नाम सरस्वती। |
| |  | अहं पुष्पम्। <br> मम नाम चम्पकम्। |

## अभ्यासः

### उदाहरणानुगुणं रिक्तस्थानानि पूरयतु

**१. एषः बालकः ।...एतस्य..... नाम मोहनः ।**

२. एषः गायकः । ............. नाम कुमारगन्धर्वः ।

**३. एषा बालिका ।...एतस्याः... नाम मोहिनी ।**

४. एषा गायिका ।............ नाम लता ।

**५. एतत् नगरम् ।...एतस्य.... नाम हरिद्वारम् ।**

६. एतत् भवनम् ।............. नाम संस्कृतधाम ।

७. **सः घनश्यामः ।....तस्य..... जनकः वसुदेवः ।**

८. सः श्यामः ।............ अग्रजः बलरामः ।

९. सः शिक्षकः ।............ पुस्तकम् एतत् ।

१०. सः तन्त्रज्ञः।............ कार्यालयः अत्र अस्ति।

११. सः रविः ।............ युतकं सुन्दरम् अस्ति ।

१२. सः सिंहः ।............ गर्जनं भयानकम् ।

१३. **सा युवती ।....तस्याः.... नाम गौरी ।**

१४. सा गीता ।............. शाटिका सुन्दरी।

१५. सा नदी ।............. वेगः अधिकः ।

१६. सा लता ।............. पत्राणि कोमलानि ।

१७. सा बुद्धिमती ।............. साहाय्यं स्वीकरोतु ।

१८. सा माता ।............. सहनशक्तिः अधिका ।